# Prapattyangapanchakam

# પ્રપત્ત્યઙ્ગાપઞ્ચકં

## Document Information

Text title : Shri Bhagavannarayanacharyapranitam Prapattyangapanchakam

File name : prapattyangapanchakaMbhagavannArAyaNAchArya.itx

Category : raama, rAmAnanda, panchaka, prapatti

Location : doc_raama

Author : bhagavannArAyaNAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# પ્રપત્ત્યઙ્ગપઞ્ચકં

અથ મઙ્ગલં -

ભગવન્તં ચ ભગવદ્રામાનન્દં તથા ગુરુમ્ ।
નમસ્કૃત્ય ચ કુર્વેઽહં સત્પ્રત્ત્યઙ્ગપઞ્ચકમ્ ॥ ૧॥

અથ પ્રપત્તિમાહાત્મ્યં -

સકૃદેવ પ્રપન્નેભ્યો રામો બ્રહ્મ પરેશ્વરઃ ।
અભયં સર્વભૂતેભ્યો દદાત્યેતત્ સુનિશ્ચિતમ્ ॥ ૨॥

અથ પ્રપત્તિસ્વરૂપં -

રામાય બ્રહ્મણે સ્વસ્ય ચાત્મનો યત્ સમર્પણમ્ ।
પ્રપત્તિરિતિ તન્નામ પ્રોક્તં ન્યાસવિશારદૈઃ ॥ ૩॥

ન્યાસસ્તસ્યાપરં નામ પ્રાજ્ઞવર્યૈઃ પ્રકીર્ત્તિતમ્ ।
પ્રપત્તેરઙ્ગભેદા હિ સ્વીકૃતાઃ પઞ્ચ પણ્ડિતૈઃ ॥ ૪॥

૧. આનુકૂલ્યસઙ્કલ્પઃ

આનુકૂલ્યસ્ય સઙ્કલ્પ આદ્યમ મતં બુધૈઃ ।
સમ્પાદ્યા સર્વથા તત્ર શ્રીરામસ્યાનુકૂલતા ॥ ૫॥

૨. પ્રાતિકૂલ્યવર્જનં

પ્રોક્તં દ્વિતીયમઙ્ગં હિ પ્રાતિકૂલ્યસ્ય વર્જનમ્ ।
સર્વથા વર્જિતા તત્ર રામસ્ય પ્રતિકૂલતા ॥ ૬॥

૩. રક્ષણવિશ્વાસઃ

રક્ષિષ્યતીતિ વિશ્વાસ ઉક્તમ તૃતીયકમ્ ।
શ્રીરામરક્ષણે યત્રાવિશ્વાસઃ પરિવર્જિતઃ ॥ ૭॥

૪. ગોમૃત્વવરણં

ગોમૃત્વવરણં પ્રોક્તમ્મઙ્ગં તસ્યાશ્ચતુર્થકમ્ ।
પ્રપન્નેન સ્વરક્ષાર્થં પ્રાર્થ્યતે તત્ર રાઘવઃ ॥ ૮॥

૫. કાર્પણ્યં

અઙ્ગ તુ પઞ્ચમં પ્રોક્તં કાર્પણ્યં બુદ્ધિશાલિભિઃ ।
ત્યક્ત્વા ધનજનાદીંશ્ચ યત્ર રામપદાશ્રયઃ ॥ ૯॥

શ્રીભગવન્નારાયણદ્વારપીઠેશનિર્મિતમ્ ।
રામપ્રપત્તયે ભૂયાત્ સત્પ્રપત્યઙ્ગપઞ્ચકમ્ ॥ ૧૦॥

ઇતિ શ્રીભગવન્નારાયણાચાર્યપ્રણીતં પ્રપત્ત્યઙ્ગપઞ્ચકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Prapattyangapanchakam*
pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*